# 1. तारा-सहस्रनामावली

वसिष्ठ उवाच - नाम्नां सहस्त्रं ताराया मुखाम्भोजाद्विनिर्गतम् ।
मन्त्रसिद्धिकरं प्रोक्तं तन्मेवद पितामह ।।1।।

वसिष्ठ बोले : हे पितामह ! तारा सहस्त्रनाम, जो कि मन्त्र सिद्धिकारक कहा गया है और आप के मुख कमल से निकला है, उसे आप मुझे बतायें ।

ब्रह्मोवाच - शृणु वत्स प्रवक्ष्यामि रहस्यं सर्वसिद्धिदम् ।
यस्योपदेशमात्रेण तव सिद्धिर्भविष्यति ।।2।।
महाप्रलयकालादौ नष्टे स्थावरजङ्गमे ।
महातारं समाकर्ण्य कृपया संहृतं तनौ ।।3।।
नाम्नां तेन महातारा ख्याता सा ब्रह्मरूपिणी ।
महाशूलत्रयं कृत्वा तत्र चैकाकिनी स्थिता ।।4।।
पुनः सृष्टेश्चिकीर्षाभूद्दिव्यसाम्राज्यसंज्ञकम् ।
नाम्नां सहस्त्रमस्यास्तु तकाराद्यं मया स्मृतम् ।।5।।
तत्प्रभावेण ब्रह्माण्ड निर्मितं सुहढं महत् ।
आविर्भूता वयं तन्त्रयन्त्रैस्तस्याः पुरा द्विज ।।6।।
स्वस्यकार्यार्थिनस्तत्र भ्रान्ता भूम्यां यथा वयम् ।
तयोपदिष्टाः कृपया भवामस्सृष्टिकारकाः ।।7।।
तस्याः प्रसादाद्विप्रेन्द्र त्रयो ब्रह्माण्डनायका ।
अन्ये सुरगणास्सर्वे तस्याः पादप्रसेवकाः ।।8।।
पठनाद्धारणात्सृष्टेः कर्ताऽहं पालको हरिः ।
तत्वाक्षरोपदेशेन संहर्ता शङ्करस्स्वयम् ।।9।।
ऋषिच्छन्दादिकं ध्यानं मूलवत्परिकीर्तितम् ।
नियोगमात्रसिद्धी च पुरुषार्थचतुष्टयम् ।।10।।

ब्रह्माजी बोले : हे वत्स ! समस्त सिद्धियों को देने वाले उस रहस्य को बतलाऊंगा जिसके उपदेश मात्र से तुम्हारी सिद्धि होगी । महाप्रलयकाल में स्थावरों तथा जङ्गमों के नष्ट हो जाने पर तनु में सहृत महा तार (अत्यन्त उच्च स्वर ओंकार ध्वनि) को कृपापूर्वक सुनकर वह उस नाम से ब्रह्म रूपिणी महातारा देवी विख्यात हुईं । तीन महाशूलों को लेकर वह अकेले स्थित हुईं । पुनः दिव्य साम्राज्यसंज्ञक सृष्टि के उत्पन्न करने की इच्छा हुई । उनके प्रभाव से सुहढ ब्रह्माण्ड का निर्माण हुआ । हे द्विज ! उस समय उनके तन्त्र यन्त्र से हम सब अविर्भूत हुये । अपने कार्य की सिद्धि के लिए हम लोग पृथिवी पर भ्रान्त होकर इधर-उधर घूमने लगे । उन देवी के उपदेश देने पर हम लोग सृष्टिकाकर बने । हे विप्रेन्द्र ! उन देवी के प्रसाद से हम तीनो ब्रह्माण्ड के नायक बने । अन्य सब देवगण उनके चरण सेवक बने । सृष्टि

के पठन तथा धारण से मैं कर्ता तथा हरि पालक हुए। तत्त्वाक्षर के उपदेश से शङ्कर जी स्वयं संहारकता हो गये। ऋषि, छन्द आदि तथा ध्यान मूल के समान बताया गया है। नियोगमात्र सिद्धि में पुरुषार्थ चतुष्टय कहा गया है।

**विनियोग :** ॐ अस्य श्रीतारातकारादिसहस्त्रनामस्तोत्रस्य वसिष्ठऋषिः अनुष्टुप्छन्दः तारादेवता सर्वेष्टसिद्धये पाठे विनियोगः।

**ऋष्यादिन्यास :** ॐ वसिष्ठऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमः मुखे। तारादेवतायै नमो हृदि। विनियोगाय नमः सर्वाङ्गे।

**हृदयादिषङ्गन्यास :** ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुं। ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्।

**करन्यास :** ॐ ह्रां अंगुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रै अनामिकाभ्या नमः। ॐ ह्रौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः करतलकरपृष्ठाभ्यां नमः।

**अथ ध्यानम् -**

प्रत्यालीढपदार्पितांघ्रिशवहृद्घोराट्टहासा परा
खड्गेन्दीवरकर्त्रिखर्पर-भुजा हुंकारबीजोद्भवा।
खर्वा नीलविशालपिङ्गलजटाजूटेकनागैर्युता
जाडयंन्यस्य कपालकर्तृ जगतां हन्त्युग्रतारा स्वयम्।

(इति ध्यात्वा स्तोत्रं पठेत्)

**स्तोत्रः**

तारा तारादिपञ्चार्णा तारान्यावेदवीर्यजा।
तारा तारहितावर्णा ताराद्या ताररूपिणी ॥11॥
तारारात्रिसमुत्पन्ना तारारात्रिस्वरूपिणी।
तारारात्रिजपासक्ता तारारात्रिस्वरूपिणी ॥12॥
ताराराज्ञीस्वसन्तुष्टा ताराराज्ञीवरप्रदा।
ताराराज्ञीस्वरूपा च ताराराज्ञीप्रसिद्धिदा ॥13॥
ताराहृत्पङ्कजागारा ताराहृत्पङ्कजापरा।
ताराहृत्पङ्कजाधारा ताराहृत्पङ्कजातथा ॥14॥

तारेश्वरी च ताराभा तारांगणस्वरूपिणी ।
तारागणसमाकीर्णा तारागणनिषेविता ।।15।।
तारा तारान्विता तारारत्नान्वितविभूषणा ।
तारागणरणासन्ना ताराकृत्यप्रपूजिता ।।16।।
तारागणकृताहारा तारागणकृताश्रया ।
तारागणकृतागारा तारागणनतत्परा ।।17।।
तारागुणगणाकीर्णा तारागुणगणप्रदा ।
तारागुणगणासक्ता तारागुणगणालया ।।18।।
तारेश्वरी तारपूज्या ताराजप्या तु तारणा ।
तारमुख्या तु ताराख्या तारदक्षा तु तारणी ।।19।।
तारगम्या तु तारस्था तारामृत तरङ्गिणी ।
तारभव्या तु तारार्णा तारहव्या तु तारिणी ।।20।।
तारका तारकांतस्था तारकाराशिभूषणा ।
तारकाहारशोभाढ्या तारकावेष्टिताङ्गणा ।।21।।
तारकाहंसकाकीर्णा तारकाकृतभूषणा ।
तारकाङ्गदशोभाङ्गी तारकाश्रितकङ्कणा ।।22।।
तारकाञ्चितकाञ्ची च तारकान्वितभक्षणा ।
तारकाचित्रवसना तारकासनमण्डला ।।23।।
तारकाकीर्णमुकुटा तारकाश्रितकुण्डला ।
तारकान्विततांटङ्कयुग्मगण्डस्थलोज्ज्वला ।।24।।
तारकाश्रितपादाब्जा तारकावरदायिका ।
तारकादत्तहृदया तारकाञ्चितसायका ।।25।।
तारकान्यासकुशला तारकान्यासविग्रहा ।
तारकान्याससन्तुष्टा तारकान्याससिद्धिदा ।।26।।
तारकान्यासनिलया तारकान्यासपूजिता ।
तारकान्याससंहृष्टा तारकान्याससिद्धिदा ।।27।।
तारकान्याससमग्ना तारकान्यासवासिनी ।
तारकान्याससम्पूर्णा मन्त्रसिद्धिविधायिनी ।।28।।
तारकोपासकप्राणा तारकोपासकप्रिया ।
तारकोपासकासाध्या तारकोपासकेष्टदा ।।29।।
तारकोपासकासक्ता तारकोपासकार्थिनी ।
तारकोपासकाराध्या तारकोपासकाश्रया ।।30।।
तारकासुरसन्तुष्टा तारकासुरपूजिता ।
तारकासुरनिर्माणकर्त्री तारकवन्दिता ।।31।।
तारकासुरसम्मान्या तारकासुरमानदा ।
तारकासुरसंसिद्धा तारकासुरदेवता ।।32।।
तारकासुरदेहस्था तारकासुरस्वर्गदा ।
तारकासुरसंसृष्टा तारकासुरगर्वदा ।।33।।
तारकासुरसंहन्त्री तारकासुरमर्द्दिनी ।
तारकासुरसंग्रामनर्तकी तारकापरा ।।34।।
तारकासुरसंग्रामतारिणी तारकारिभृ ।
तारकासुरसंग्रामकबंधवृन्दवन्दिता ।।35।।
तारकारिप्रसूस्तारकारिमाता तुकारिका ।
तारकारिमनोहारिवस्त्रभूषानुशासिका ।।36।।
तारकारिविधात्री च तारकारिनिषेविता ।
तारकारिवचस्तुष्टा तारकारिसुशिक्षिता ।।37।।
तारकारिसुसन्तुष्टा तारकारिविभूषिता ।
तारकारिकृतोत्सङ्गा तारकारिप्रहर्षदा ।।38।।
तमःसम्पूर्णसर्वाङ्गी तमोलिप्तकलेवरा ।
तमोव्याप्तस्थलासङ्गा तमःपटलसन्निभा ।।39।।
तमाहन्त्री तमःकर्त्री तमःसचारकारिणी ।
तमोगात्री तमोदात्री तमःपात्री तमोपहा ।।40।।
तमोराशेः पूर्णराशिस्तमोराशि विनाशिनी ।
तमोराशिकृतध्वंसी तमोराशिभयङ्करी ।।41।।
तमोगुणप्रसन्नास्या तमोगुणसुसिद्धिदा ।
तमोगुणोक्तमार्गस्था तमोगुणविराजिता ।।42।।
तमोगुणस्तुतिपरा तमोगुणविवर्द्धिनी ।
तमोगुणाश्रितपरा तमोगुणविनाशिनी ।।43।।
तमोगुणक्षयकरी तमोगुणकलेवरा ।
तमोगुणध्वंसतुष्टा तमःपारे प्रतिष्ठिता ।।44।।
तमोभवभवप्रीता तमोभवभवप्रिया ।
तमोभवभवश्रद्धा तमोभवभवाश्रया ।।45।।
तमोभवभवप्राणा तमोभवभवार्चिता ।
तमोभवभवप्रीत्यालीढकुम्भस्थलस्थिता ।।46।।
तपस्विवृन्दसन्तुष्टा तपस्विवृन्दपुष्टिदा ।
तपस्विवृन्दसंस्तुल्या तपस्विवृन्दवन्दिता ।।47।।
तपस्विवृन्दसम्पन्ना तपस्विवृन्दहर्षदा ।
तपस्विवृन्दसम्पूज्या तपस्विवृन्दभूषिता ।।48।।
तपस्विचित्ततल्पस्था तपस्विचित्तमध्यगा ।
तपस्विचित्तचित्तार्हा तपस्विचित्तहारिणी ।।49।।
तपस्विकल्पबल्याभा तपस्विकल्पपादपा ।
तपस्विकामधेनुश्च तपस्विकामपूर्तिदा ।।50।।
तपस्वित्राणनिरता तपस्विगृहसंस्थिता ।
तपस्विगृहराज्यश्रीस्तपस्विराज्यदायिका ।।51।।
तपस्विमानसाराध्या तपस्विमानदायिका ।
तपस्वितापसंहर्त्री तपस्वितापशान्तिकृत् ।।52।।
तपस्विसिद्धिविद्या च तपस्विमन्त्रसिद्धिकृत् ।
तपस्विमन्त्रतन्त्रेशी तपस्विमन्त्ररूपिणी ।।53।।
तपस्विमन्त्रनिपुणा तपस्विकर्मकारिणी ।
तपस्विकर्मसम्भवा तपस्विकर्मसाक्षिणी ।।54।।
तपस्सेव्या तपोभव्या तपोभाव्या तपस्विनी ।
तपोवश्या तपोगम्या तपोगेहनिवासिनी ।।55।।
तपोधन्या तपोमान्या तपःकन्या तपोवृता ।
तपस्तथ्या तपोगोप्या तपोजप्या तपोनृता ।।56।।
तपस्साध्या तपोराध्या तपोवन्द्या तपोमयी ।
तपस्सन्ध्या तपोवन्ध्या तपस्सान्निध्यकारिणी ।।57।।
तपोधेया तपोज्ञेया तपस्तप्ता तपोला ।
तपोलेया तपोदेया तपस्तत्त्वफलप्रदा ।।58।।
तपोविघ्नवरघ्नी च तपोविघ्नविनाशिनी ।
तपोविघ्नचयध्वंशी तपोविघ्नभयङ्करी ।।59।।
तपोभूमिवरप्राणा तपोभूमिपतिस्तुता ।
तपोभूमिपतिध्येयया तपोभूमिपतीष्टदा ।।60।।
तपोवनकुरङ्गस्था तपोवनविनाशिनी ।
तपोवनगतिप्रीता तपोवनविहारिणी ।।61।।
तपोवनफलासक्ता पतोवनफलप्रदा ।
तपोवनसुसाध्या च तपोवनसुसिद्धिदा ।।62।।
तपोवनसुसेव्या च तपोवननिवासिनी ।
तपोधनसुसंसेव्या तपोधनसुसाधिता ।।63।।
तपोधनसुसंलीना तपोधनमनोमयी ।
तपोधननमस्कारा तपोधनविमुक्तिदा ।।64।।
तपोधनधनासाध्या तपोधनधनात्मिका ।
तपोधनधनाराध्या तपोधनफलप्रदा ।।65।।
तपोधनधनाढ्या च तपोधनधनेश्वरी ।
तपोधनधनप्रीता तपोधनधनालया ।।66।।

तपोधनजनाकीर्णा तपोधनजनाश्रया ।
तपोधनजनाराध्या तपोधनजनप्रसूः ॥67॥
तपोधनजनप्राणा तपोधनजनेष्टदा ।
तपोधनजनासाध्या तपोधनजनेश्वरी ॥68॥
तरुणासृक्प्रपानार्ता तरुणासृक्प्रतर्पिता ।
तरुणासृक्समुद्रस्था तरुणासृक्प्रहर्षदा ॥69॥
तरुणासृक्सुसन्तुष्टा तरुणासृग्विलेपिता ।
तरुणासृङ्नदीप्राणा तरुणासृग्विभूषणा ॥70॥
तरुणैणबलिप्रीता तरुणैणबलिप्रिया ।
तरुणैणबलिप्राणा तरुणैणबलीष्टदा ॥71॥
तरुणाजबलिप्रीता तरुणाजबलिप्रिया ।
तरुणाजबलिघ्राणा तरुणाजबलिप्रभुक् ॥72॥
तरुणादित्यसङ्काशा तरुणादित्यविग्रहा ।
तरुणादित्यरुचिरा तरुणादित्यनिर्मला ॥73॥
तरुणादित्यनिलया तरुणादित्यमण्डला ।
तरुणादित्यललिता तरुणादित्यकुण्डला ॥74॥
तरुणार्कसमज्योत्स्ना तरुणार्कसमप्रभा ।
तरुणार्कप्रतीकाशा तरुणार्कप्रवर्द्धिता ॥75॥
तरुणा तरुणनेत्रा च तरुणारुणलोचना ।
तरुणातरुणगात्रा च तरुणातरुणभूषिणा ॥76॥
तरुणीदत्तसंकेता तरुणीदत्तभूषणा ।
तरुणीगणसन्तुष्टा तरुणी तरुणीमणिः ॥77॥
तरुणीमर्णिसंसेव्या तरुणीमणिवन्दिता ।
तरुणीमणिसन्तुष्टा तरुणीमणिपूजिता ॥78॥
तरुणीवृन्दसंवन्द्या तरुणीवृन्दवन्दिता ।
तरुणीवृन्दसंस्तुत्या तरुणीवृन्दमानदा ॥79॥
तरुणीवृन्दमध्यस्था तारुणीवृन्दवेष्ठिता ।
तरुणीवृन्दसम्प्रीता तरुणीवृन्दभूषिता ॥80॥
तरुणीजयससिद्धा तरुणीजयमोक्षदा ।
तरुणीजूजकासक्ता तरुणीपूजकार्थिनी ॥81॥
तरुणीपूजकश्रीदा तरुणीपूजकार्त्तिहा ।
तरुणीपूजकप्राणा तरुणीनिन्दकार्त्तिहा ॥82॥
तरुणीकोटिनिलया तरुणीकोटिविग्रहा ।
तरुणीकोटिमव्यस्था तरुणीकोटिवेष्टिता ॥83॥
तरुणीकोटिदुस्साध्या तरुणीकोटिविग्रहा ।
तरुणीकोटिरुचिरा तरुणी तरुणीश्वरी ॥84॥
तरुणीमणिहाराढ्या तरुणीमणिकुण्डला ।
तरुणीमणिसन्तुष्टा तरुणीमणिमण्डिता ॥85॥
तरुणीसरणिप्रीता तरुणीसरणीरता ।
तरुणीसरणिस्थाना तरुणीसरणीरता ॥86॥
तरणीमण्डलश्रीदा तरणीमण्डलेश्वरी ।
तरणीमण्डलश्रद्धा तरणीमण्डलस्थिता ॥87॥
तरणीमण्डलार्घ्याढ्या तरणीमण्डलार्चिता ।
तरणीमण्डलध्येया तरणीभवसागरा ॥88॥
तरणीकरणासक्ता तरणीतक्षकार्चिता ।
तरणीतक्षकश्रीदा तरणीतक्षकार्थिनी ॥89॥
तरणीतरणशीला च तरीतरणतारिणी ।
तरीतरणसम्वेद्या तरीतरणकारिणी ॥90॥
तरुरूपा तरुरूपस्था तरुस्तरुलतामयी ।
तरुरूपा तरुस्था च तरुमध्यनिवासिनी ॥91॥
तप्तकाञ्चनगेहस्था तप्तकाञ्चनभूमिका ।
तप्तकाञ्चनप्राकारा तप्तकाञ्चनपादुका ॥92॥
तप्तकाञ्चनदीप्ताङ्गी तप्तकाञ्चनसन्निभा ।
तप्तकाञ्चनगौराङ्गी तप्तकाञ्चनमञ्चगा ॥93॥
तप्तकाञ्चनवस्त्राढ्या तप्तकाञ्चनरूपिणी ।
तप्तकाञ्चनमध्यस्था तप्तकाञ्चनकारिणी ॥94॥
तप्तकाञ्चनमासार्च्या तप्तकाञ्चनपात्रभुक् ।
तप्तकाञ्चनशैलस्था तप्तकाञ्चनकुण्डला ॥95॥
तप्तकाञ्चनक्षेत्राढ्या तप्तकाञ्चनदण्डधृक ।
तप्तकाञ्चनभूषाढ्या तप्तकाञ्चनदानदा ॥96॥
तप्तकाञ्चनदेशेशी तप्तकाञ्चनचापधृक् ।
तप्तकाञ्चनतूणाढ्या तप्तकाञ्चनबाणभृत् ॥97॥
तलातलविधात्री च तलातलविधायिनी ।
तलातलस्वरूपेशी तलातलविहारिणी ॥98॥
तलातलजनासाध्या तलातलजनेश्वरी ।
तलातलजनाराध्या तलातलजनार्थदा ॥99॥
तलातलजयाभाक्षी तलातलजचञ्चला ।
तलातलजरत्नाढ्या तलातलजदेवता ॥100॥
तटिनीस्थानरसिका तटिनी तटवासिनी ।
तटिनी तटिनीतरिगामिनी तटिनीप्रिया ॥101॥
तटिनीप्लवनप्रीता तटिनीप्लनोद्यता ।
तटिनीप्लवनश्लाघ्या तटिनीप्लवनार्थदा ॥102॥
तटलास्या तटस्थाना तटेशी तटवासिनी ।
तटपूज्या जटाराध्या तटरोममुखार्थिनी ॥103॥
जटजा तटरूपा च तटस्था तटचञ्चला ।
तटसन्निधिगेहस्था सहिता तटशायिनी ॥104॥
तरङ्गिणी तरङ्गाभा तरङ्गायतलोचना ।
तरङ्गसमदर्द्धर्षा तरङ्गसमचञ्चला ॥105॥
तरङ्गसमदीर्घाङ्गी तरङ्गसमवर्द्धिता ।
तरङ्गसमसम्वृद्धिस्तरंगसमनिर्मला ॥106॥
तडागमध्यनिलया तडागमध्यसम्भवा ।
तडागरचनश्लाघ्या तडागरचनोद्यता ॥107॥
तडागकुमुदामोदी तडागेशी तडागिनी ।
तडागनीरसंस्नाता तडागनीरनिर्मला ॥108॥
तडागकमलागारा तडागकमलालया ।
तडागकमलान्तस्था तडागकमलोद्यता ॥109॥
तडागकमलाङ्गी च तडागकमलानना ।
तडागकमलप्राणा तडागकमलानना ॥110॥
तडागरक्तपद्मस्था तडागश्वेतपद्मगा ।
तडागनीलपद्माभा तडागनीलपद्मभृत् ॥111॥
तनुस्तनुगता तन्वी तन्वङ्गी तनुधारिणी ।
तनुरूपा तनुगता तनुधुक्तनुरुपिणी ॥112॥
तनुस्था तनुमध्याङ्गी तनुकृत्तनुमङ्गला ।
तनुसेव्या तु तनुजा तनुजा तनुसम्भवा ॥113॥
तनुभृत्तनुसम्भूता तनुदा तनुकारिणी ।
तनुभृत्तनुसंहन्त्री तनुसञ्चारकारिणी ॥114॥
तथ्यवाक तथ्यवचना तथ्यकृत्तथ्यवादिनी ।
तथ्यभृत्तथ्यचरिता तथ्यधर्मानुवर्तिनी ॥115॥
तथ्यभुक्तथ्यगमना तथ्यभक्तिवरप्रदा ।
तथ्यनीचेश्वरी तथ्यचित्ताचारासुसिद्धिदा ॥116॥
तर्क्यातर्क्यस्वभावा च तर्कदा या तु तर्ककृत् ।
तर्काध्यापनमध्यस्था तर्काध्यापनकारिणी ॥117॥
तर्काध्यापनसन्तुष्टा तर्काध्यापनरूपिणी ।
तर्काध्यापनसंशीला तर्कार्थप्रतिपादिता ॥118॥

तर्काध्यापनसंतृप्ता तर्कार्थप्रतिपादिता ।
तर्कवादाश्रितपदा तर्कवादविवर्द्धिनी ॥119॥
तर्कवादैकनिपुणा तर्कवादप्रचारिणी ।
तमालदलश्यामाङ्गी तमालदलमालिनी ॥120॥
तमालवनसंकेता तमालपुष्पपूजिता ।
तगरीतगराराद्धया तगरार्चितपादुका ॥121॥
तगरस्त्रक्सुसन्तुष्टा तगरस्त्रग्विराजिता ।
तगराहुतिसन्तुष्टा तगराहुतिकीर्तिदा ॥122॥
तगराहुतिसंसिद्धा तगराहुतिमानदा ।
तडित्तडिल्लताकारा तडिच्चञ्चललोचना ॥123॥
तडिल्लता तडित्तन्वी तडिद्दीप्ता तडित्प्रभा ।
तद्रूपा तत्स्वरूपेशी तन्मयी तत्त्वरूपिणी ॥124॥
तत्स्थानदानिरता तत्कर्मफलदायिनी ।
तत्त्वकृत्तत्त्वदा तत्त्वा तत्त्ववित्तत्त्वतर्पिता ॥125॥
तत्त्वार्च्यातत्त्वपूज्या चतत्त्वार्घ्या तत्त्वरूपिणी ।
तत्त्वज्ञानप्रदानेशी तत्त्वज्ञानसुमोक्षदा ॥126॥
त्वरितात्वरितप्रीता त्वरितार्त्तिविनाशिनीं ।
त्वरितासवसन्तुष्टा त्वरितासवतर्पिता ॥127॥
त्वग्वस्त्रा त्वग्परीधाना तरला तरलेक्षणा ।
तरक्षुचर्मवसना तरक्षुत्वग्विभूषणा ॥128॥
तरक्षुस्तरक्षुप्राणा तरक्षुपृष्ठगामिनी ।
तरक्षुपृष्ठसंस्थाना तरक्षुपृष्ठवासिनी ॥129॥
तर्पितोदैस्तर्णणाशा तर्पणासक्तमानसा ।
तर्पणानन्दहृदया तर्पणाधिपतिस्ततिः ॥130॥
त्रयीमयी त्रयीसेव्या त्रयीपूज्या त्रयीकथा ।
त्रयीभत्र्या त्रयीभाव्या त्रयीहव्या त्रयीयुता ॥131॥
त्र्यक्षरी त्र्यक्षरेशानी त्र्यक्षरीशीघ्रसिद्धिदा ।
त्र्यक्षरेशी त्र्यक्षरीस्था त्र्यक्षरीपुरुषास्पदा ॥132॥
तपना तपनेष्टा च तपस्तपनकन्यका ।
तपनांशुसमासह्या तपनकोटिकान्तिकृत् ॥133॥
तपनीया तल्पगता तल्पातल्पविधायिनी ।
तल्पकृत्तल्पगा तल्पदात्री तल्पतलाश्रया ॥134॥
तपनीयतलारात्री तपनीयांशुप्रार्थिनी ।
तपनीयप्रदा तप्ता तपनीयाद्रिसंस्थिता ॥135॥
तल्पेशी तल्पदा तल्पसंस्थिता तल्पवल्लभा ।
तल्पप्रिया तल्परता तल्पनिर्माणकारिणी ॥136॥
तरसापूजनासक्ता तरसावरदायिनी ।
तरसासिद्धिसन्धात्री तरसामोक्षदायिनी ॥137॥
तापसी तापसाराध्या तापसार्तिविनाशिनी ।
तापसार्ता तापसश्रीस्तापसप्रियवादिनी ॥138॥
तापसानन्दहृदया तापसानन्ददायिनी ।
तपसाश्रितपादाब्जा तापसासक्तमानसा ॥139॥
तामसी तामसीपूज्या तामसीप्रणयोत्सुका ।
तामसी तामसीसीता तामसीशीघ्रसिद्धिदा ॥140॥
तालेशी तालभुक्तालदात्री तालोपमस्तनी ।
तालवृक्षस्थिता तालवृक्षजा तालरूपिणी ॥141॥
तार्क्ष्या तार्क्ष्यसमारूढा तार्क्ष्येशी तार्क्ष्पूजिता ।
तार्क्ष्येश्वरी तार्क्ष्माता तार्क्ष्शीवरदायिनी ॥142॥
तापी तु तपनी तापसंहन्त्री तापनाशिनी ।
तापदात्री तापकर्त्री तापविध्वंसकारिणी ॥143॥
त्रासकर्त्री त्रासदात्री त्रासहर्त्री च त्रासहा ।
त्रासिता त्रासरहिता त्रासनिर्मूलकारिणी ॥144॥

त्राणकृत त्राणसंशीला तानेशी तानदायिनी ।
तानगानरता तानकारिणी तानगायिनी ॥145॥
तारुण्यामृतसम्पूर्णा तारुण्यामृतवारिधिः ।
तारुण्यामृतसन्तुष्टा तारुण्यामृततर्पिता ॥146॥
तारुण्यामृतपूर्णाङ्गी तारुण्यामृतविग्रहा ।
तारुण्यगुणसम्पन्ना तारुण्योक्तिविशारदा ॥147॥
ताम्बूली ताम्बूलेशानी ताम्बूलचर्वणोद्यता ।
ताम्बूलपूरितास्या च ताम्बूलरुणिताधरा ॥148॥
ताटङ्करत्नविख्यातिस्ताटङ्करत्नभूषिणी ।
ताटङ्करत्नमध्यस्था ताटङ्कद्वयभूषिता ॥149॥
तिथीशा तिथि सम्पूज्या तिथिस्था तिथिरूपिणी ।
त्रितिथिवासिनीसेव्या तिथीशवरदायिनी ॥150॥
तिलोत्तमादिकाराध्या तिलोत्तमादिकप्रभा ।
तिलोत्तमा तिलप्रेक्ष्या तिलाराध्या तिलार्चिता ॥151॥
तिलभक् तिलसन्दात्री तिलतुष्टा तिलालया ।
तिलदा तिलसङ्काशा तिलतैलविधायिनी ॥152॥
तिलतैलोपलिप्तांगी तिलतैलसुगन्धिनी ।
तिलाज्यहोमसन्तुष्टा तिलाज्यहोमसिद्धिदा ॥153॥
तिलपुष्पांजलिप्रीता तिलपुष्पांजलिप्रिया ।
तिलपुष्पांजलिश्रेष्ठा तिलपुष्पाघनाशिनी ॥154॥
तिलकाश्रितसिन्दूरा तिलकाङ्कितचन्दना ।
तिलकाहृतकस्तूरी तिलकामोदमोहिनी ॥155॥
त्रिगुणा त्रिगुणाकारा त्रिगुणान्वितविग्रहा ।
त्रिगुणाकारविख्याता त्रिमूर्तिस्त्रिगुणात्मिका ॥156॥
त्रिशिरा त्रिपुरेशानी त्रिपुरा त्रिपुरेश्वरी ।
त्रिपरेशी त्रिलोकस्था त्रिपरी त्रिपराम्बिका ॥157॥
त्रिपुरारिसमाराध्या त्रिपुरारिवरप्रदा ।
त्रिपुरारिशिरोभूषा त्रिपुरारिवरप्रदा ॥158॥
त्रिपुरीष्टसन्दात्री त्रिपुरारीष्टदेवता ।
त्रिपुरारिकृताद्धाङ्गी त्रिपुरारिविलासिनी ॥159॥
त्रिपुरासुरसंहर्त्री त्रिपुरासुरमर्द्दिनी ।
त्रिपुरासुरसंसेव्या त्रिपुरासुरवर्यपा ॥160॥
त्रिकुटा त्रिकुटाराध्या त्रिकूटार्चितविग्रहा ।
त्रिकूटाचलमध्यस्था त्रिकूटाचलवासिनी ॥161॥
त्रिकूटाचलसञ्जाता त्रिकूटाचलनिर्गता ।
त्रिकूटा त्रिजटेशानी त्रिजटावरदायिनी ॥162॥
त्रिनेत्रेशी त्रिनेत्रा च त्रिनेत्रवरवर्णिनी ।
त्रिवली त्रिवलीयुक्ता त्रिशूलवरधारिणी ॥163॥
त्रिशूलेशी त्रिशूलीशी त्रिशूलभुत्त्रिशुलिनी ।
त्रिमनुर्स्त्रिमनपास्या त्रिमनूपासकेश्वरी ॥164॥
त्रिमनुजपसन्तुष्टा त्रिमनुध्यानमोक्षदा ।
त्रिमनुपूजनप्रीता त्रिमनुध्यानमोक्षदा ॥165॥
त्रिविधा त्रिविधाभक्तिस्त्रिमता त्रिमतेश्वरी ।
त्रिभावस्था त्रिभावेशी त्रिभावपरिपूरिता ॥166॥
त्रितत्त्वात्मा वितत्त्वेशी त्रितत्तवज्ञा त्रितत्त्वधृक् ।
त्रितत्त्वाचमनप्रीता त्रितत्त्वाचमनेष्टदा ॥167॥
त्रिकोणस्था त्रिकोणेशी त्रिकोणचक्रवासिनी ।
त्रिकोणचक्रमध्यस्था त्रिकोणबिन्दुरूपिणी ॥168॥
त्रिकोणयन्त्रसंस्थाना त्रिकोणयन्त्ररूपिणी ।
त्रिकोणयन्त्रसम्पूज्या त्रिकोणयन्त्रसिद्धिदा ॥169॥
त्रिवर्णाढया त्रिवर्णेशी त्रिवर्णोपास्यरूपिणी ।
त्रिवर्णस्था त्रिवर्णाढ्या त्रिवर्णावरदायिनी ॥170॥

त्रिवर्णाद्या त्रिवर्णार्च्या त्रिवर्गफलदायिनी ।
त्रिवर्गाढ्या त्रिवर्गेशी त्रिवर्गाद्यफलप्रदा ।।171।।
त्रिसन्ध्यार्च्या त्रिसन्ध्येशी त्रिसन्ध्याराधनेष्टदा ।
त्रि संध्यार्चनसन्तुष्टा त्रिसन्ध्याजपमोक्षदा ।।172।।
त्रिपदाराधितप्रदा त्रिपदा त्रिपदेश्वरी ।
विपदाप्रतिपाद्येशी त्रिपदाप्रतिपादिका ।।173।।
त्रिशक्तिश्च त्रिशक्तीशी त्रिशक्तेष्टफलप्रदा ।
त्रिशक्तेष्टा त्रिशक्तीष्टा त्रिशक्तिपरिवेष्टिता ।।174।।
त्रिवेणी च त्रिवेणीस्त्री त्रिवेणीमाधवार्चिता ।
त्रिवेणीजलसन्तुष्टा त्रिवेणीजलरूपिणी ।।175।।
त्रिवेणीजलसंस्नाता त्रिवेणीजलरूपिणी ।
त्रिवेणीजलपूताङ्गी त्रिवेणीजलपूजिता ।।176।।
त्रिनाडीस्था त्रिनाडीशी त्रिनाडीमध्यगामिनी ।
त्रिनाडीसन्ध्यसञ्छेद्या त्रिनाडी च त्रिकोटिनी ।।177।।
त्रिपञ्चाश्यात्रिरेखा च त्रिशक्तिपथगामिनी ।
त्रिपथस्था त्रिलोकेशी त्रिकोटिकुलमोक्षदा ।।178।।
त्रिरामेशी त्रिरामार्च्या त्रिरामवरदायिनी ।
त्रिदशाश्रितपादाब्जा त्रिदशालयचञ्चला ।।179।।
त्रिदशा त्रिदशप्रार्ध्या त्रिदशाशुवरप्रदा ।
त्रिदशैश्वर्ययम्पन्ना त्रिदशेश्वरसेविता ।।180।।
त्रियामार्च्या त्रियामेशी त्रियामानन्तसिद्धिदा ।
त्रियामेशाधिकज्योत्स्ना त्रियामेशाधिकानना ।।181।।
त्रियामानाथवत्सौम्या त्रियामानाथभूषणा ।
त्रियामानाथलावण्या रत्नकोटियुतानना ।।182।।
त्रिकालस्था त्रिकालज्ञा त्रिकालज्ञत्वकारिणी ।
त्रिकालेशी त्रिकालार्च्या त्रिकालज्ञत्वदायिनी ।।183।।
तीरभुक्तीरगा तीरसरिता तीरवासिनी ।
तीरभुग्देशसंजाता तीरभुग्देशसंस्थिता ।।184।।
तिग्मा तिग्मांशुसंकाशा तिग्माशुकोडसंस्थिता ।
तिग्मांशुकोटिदीप्ताङ्गी तिग्मांशुकोटिविग्रहा ।।185।।
तीक्ष्णा तीक्ष्णतरा तीक्ष्णमहिषासुरमर्दिनी ।
तीक्ष्णकर्त्रीलसत्पाणिस्तीक्ष्णा सिंवरधारिणी ।।186।।
तीव्रा तीव्रगतिस्तीव्रासुरसङ्घविनाशिनी ।
तीव्राष्टनागाभरणा तीव्रमुण्डविभूषणा ।।187।।
तीर्थात्मिका तीर्थमयी तीर्थेशी त्तीर्थपूजिता ।
तीर्थराजेश्वरी तीर्थफलदा तीर्थदानदा ।।188।।
तुमुली तुमुलप्राज्ञी तुमुलासुरघातिनी ।
तुमुलक्षतजप्रीता तुमुलांगणनर्तकी ।।189।।
तुरगी तुरगारूढा तुरङ्गपृष्ठगामिनी ।
तुरङ्गगमनाह्लादा तुरंगवेगगामिनी ।।190।।
तुरीया तुलना तुल्या तुल्यवृत्तिस्तु तुल्यकृत् ।
तुलनेशी तुलाराज्ञी तुलाराज्ञीत्वसूक्ष्मवित् ।।191।।
तुम्बिका तुम्बिकापात्रभोजना तुम्बिकार्थिनी ।
तुलसी तुलसीवर्या तुलजा तुलजेश्वरी ।।192।।
तुषाग्निव्रतसन्तुष्टा तुषाग्निस्तुषराशिकृत् ।
तुषारकरशीतांगी तुषारकरपूर्तिकृत् ।।193।।
तुषाराद्रिस्तुषाराद्रिसुता तुहिनदीधितिः ।
तुहिनाचलकन्या च तुहिनाचलवासिनी ।।194।।
तुर्यवर्गेश्वरी तुर्यवर्गदा तुर्यवेददा ।
तुर्यवर्यात्मिका तुर्यतुर्येश्वरस्वरूपिणी ।।195।।
तुष्टिदा तुष्टिकृत्तुष्टिस्तूणीरद्वयपृष्ठधृक् ।
तुम्बुराज्ञानसन्तुष्टा तुष्टसंसिद्धिदायिनी ।।196।।
तूर्णाराज्यप्रदा तूर्णगद्गदा तूर्णपद्यदां ।
तूर्णपाण्डित्यसन्दात्री तूर्णपूर्णबलप्रदा ।।197।।
तृतीया च तृतीयेशी तृतीयातिथिपूजिता ।
तृतीया चन्द्रचूडेशी तृतीयचन्द्रभूषणा ।।198।।
तृप्तिस्तृप्तिकरी तृप्ता तृष्णा तृष्णाविवर्द्धिनी ।
तृष्णापूर्णकरी तृष्णानाशिनी तृषिता तृषा ।।199।।
त्रेतासंसाधिता त्रेता त्रेतायुगफलप्रदा ।
त्रैलोक्यपूज्या त्रैलोक्यदात्री त्रैलोक्यसिद्धिदा ।।200।।
त्रैलोक्येश्वरतादात्री त्रैलोक्यपरमेश्वरी ।
त्रैलोक्येमोहनेशानी त्रैलोक्यराज्यदायिनी ।।201।।
तैत्रिशाखेश्वरी तैत्रिशाखा तैत्रविवेकदा ।
तोरणान्वितगेहस्था तोरणासक्तमानसा ।।202।।
तोलकास्वर्णसंदात्री तोलकास्वर्णकङ्कणा ।
तोमरायुधरूपा च तोमरायुधधारिणी ।।203।।
तौर्यत्रिकेश्वरी तार्यत्रिकी तौयत्रिकोत्सुकी ।
तन्त्रकृत्तन्त्रवत्सूक्ष्मा तन्त्रमन्त्रस्वरूपिणी ।।204।।
तन्त्रकृत्तन्त्रसम्पूज्या तन्त्रेशी तन्त्रसम्मता ।
तन्त्रज्ञा तन्त्रवित्तन्त्रसाध्या तन्त्रस्वरूपिणी ।।205।।
तन्त्रस्था तन्त्रजा तन्त्री तन्त्रभृत्तन्त्रमन्त्रदा ।
तन्त्राद्या तन्त्रगा तन्त्रा तन्त्रार्च्या तन्त्रसिद्धिदा ।।206।।

## फलश्रुति

इति ते कथितं दिव्यं ऋतुकोटिफलप्रदम् ।
नाम्नां सहस्त्र तारायास्तकाराद्यं सुगोपितम् ।।207।।
दानं यज्ञस्तपस्तीर्थं व्रतं चानशनादिकम् ।
एकैंकनामसम्पुण्यं सन्ध्यासुगदितं मया ।।208।।
गुरौ देवे तथा मन्त्रे यस्य स्यान्निश्चला मतिः ।
तस्यैव स्तोत्रपाठेऽस्मिन्समभवेदधिकारिता ।।209।।
महाचीनक्रमाभिन्नषोढान्यस्तकलेवरः ।
क्रमदीक्षान्वितो मन्त्री पठेदेतन्नचान्यथा ।।210।।
गन्धपुष्पादिभिर्द्रव्यैर्मकारैः पञ्चभिर्द्विजः ।
सम्पूज्य तारां विधिवत्पठेदेतदनन्यधीः ।।211।।
अष्टम्यां च चतुर्दश्यां संकान्तौ रविवासरे ।
शनिभौमदिने रात्रौ ग्रहणो चन्द्रसूर्ययोः ।।212।।
तारारात्रौ कालरात्रौ मोहरात्रौ विशेषतः ।
पठनान्मन्त्रसिद्धिः स्यात्सर्वज्ञत्वं प्रजायतेः ।।213।।
श्मशाने प्रान्तरे रम्ये शूल्यागारे विशेषतः ।
देवागारे गिरौ वापि स्तवपारायणं चरेत् ।।214।।
ब्रह्महत्या सुरापानं स्तेयं स्त्रीगमनादिकम् ।
गुरुतल्पे तथा चान्यत्पातकन्नश्यति ध्रुवम् ।।215।।
लतामध्यगतो मन्त्री श्रद्धया चार्चयेद्यदि ।
आकर्षयेत्तदा रम्भां मेनामपि तथोर्वशीम ।।216।।
संग्रामसमये वीररतारा साम्राज्यकीर्त्तनात् ।
चतुरंगचयं जित्वा सर्वसाम्राज्यभाग्भवेत् ।।217।।
निशार्द्धे पूजनान्ते च प्रतिनाम्ना प्रपूजयेत् ।
एकैकं करवीराद्यैर्मन्दारैर्नीलवारिजैः ।।218।।
गद्यपद्यमयी वाणी भूभोज्या च प्रवर्तते ।
पाण्डित्यं सर्वशास्त्रेषु वादी त्रस्यति दर्शनात् ।।219।।
वह्निजापान्तकैरेतैस्ताराद्यैः प्रतिनामभिः ।
राजन्यं सर्वराजेषु परकाय प्रवेशनम् ।।220।।
अन्तर्धानं खेचरत्वं बहुकायप्रकाशनम् ।
गुटिका पादुका पद्मावती मधुमती तथा ।।221।।
रसं रसायनाः सर्वाः सिद्धयः समुपस्थिताः ।

कर्पूरागरुकस्तूरीचन्दनैः संयुतैर्जलैः ॥222॥
मूलसम्पुटितेनैव प्रतिनाम्ना प्रपूजयेत् ।
यक्षराक्षसगन्धर्वविद्याधर महोरगाः ॥223॥
भूतप्रेतपिशाचाद्या डाकिनीशाकिनीगणाः ।
दुष्टभैरववेतालाः कुष्माण्डाः किन्नरीगणाः ॥224॥
भयभीताः पलायन्ते तेजसा साधकस्य च ।
मन्त्रज्ञाने समुत्पन्ने प्रतिनाम्ना विचारयेत् ॥225॥
मन्त्रसम्पुटितेनैव तस्य शान्तिर्भवेद्ध्रुवम् ।
ललिता वशमायान्ति दास्यतां यान्ति पार्थिवाः ॥226॥
अग्नयः शीततां यान्ति जापकस्य च भाषणात् ।
एकावर्तनमात्रेण राजभीतिनिवारणम् ॥227॥
वेलावर्तनमात्रेण पशुवृद्धिः प्रजायते ।
दशावृत्या धनप्राप्तिविंशत्या राज्यमाप्नुयात् ॥228॥
शतावृत्या गृहे तस्य चञ्चला निश्चला भवेत् ।
गङ्गाप्रवाहवद्वाणी प्रलापादपि जायते ॥229॥
पुत्र पौत्रान्विता मन्त्री चिरञ्जीवी तु देववत् ।
शतद्वयावर्त्तनेन देववत्पूज्यते जनैः ॥230॥
शतपञ्चकमावर्त्य स भवेद्भैरवोपमः ।
सहस्त्रावर्तनेनैव मन्त्रस्तस्य स्वसिद्धिदः ॥231॥
तस्मिन्प्रवर्त्तते सर्वसिद्धिः सर्वार्थसाधिनी ।
पादुकाञ्चनवेतालापातालगमनादिकम् ॥232॥
विविधा यक्षिणीसिद्धिर्वाक्सिद्धिस्तस्य जायेत ।
शोषणं सागराणाञ्च धरायां भ्रमणं तथा ॥233॥
नवीनसृष्टिनिर्माणं सर्वं कर्तुं क्षमो भवेत् ।
अयुतावर्तनेनैव तारां पश्यति चक्षुषा ॥234॥
लक्षावर्तनमात्रेण तारापतिसमो भवेत् ।
न किञ्चिद्दुर्लभं तस्य जीवन्मुक्तो हि भूतले ॥235॥
कल्पान्ते न तु तत्पश्चात्तारासायुज्यमाप्नुयात् ।
यद्धि तारासमा विद्या नास्ति तारुण्यरूपिणी ॥236॥
न चैतत्सदृशं स्तोत्रं भवेद्ब्रह्माण्डमण्डले ।
वक्त्रकोटिसहस्त्रैस्तु जिह्वाकोटिशतैरपि ॥237॥
न शक्यते फलं वक्तुं मया कल्पशतैरपि ।
चुम्बके निन्दके दुष्टे पिशुने जीवहिंसके ॥238॥
सङ्गोप्यं स्तोत्रमे तत्तद्दर्शनेनैव कुत्र चित् ।
राज्यं देयं धनं देयं शिरो देयमथापि वा ॥239॥
न देयं स्तोत्रवर्यं तु मन्त्रादपि महोद्यतम् ।
अनुलोमविलोमाभ्यां मूलसम्पुटितं त्विदम् ॥240॥
लिखित्वा भूर्जपत्रादौ गन्धाष्टकपुरस्सरैः ।
धारयेद्दक्षिणो बाहौ कण्ठे वामभुजे तथा ॥241॥
तस्य सर्वार्थसिद्धिः स्याद्वह्निना नैव दह्यते ।
तद्गात्रं शस्त्रसंघैश्च भिद्यते न कदाचन ॥242॥
स भूमिवलये पुत्र विचरेद्भैरवोपमः ।
वन्ध्यापि लभते पुत्रं निर्धनो धनमाप्नुयात् ॥243॥
निर्विघ्नो लभते विद्यां तर्कव्याकरणादिकाम् ॥244॥
इति निगदितमस्यास्तादिनाम्नां सहस्त्रं
वरदमनुनिधानं दिव्यसाम्राज्यसंज्ञम् ।
विधिहरिगिरिशादौ शक्तिदानैकदक्षं
समविधि पठनीयं कालितारासमज्ञैः ॥245॥

॥ इति श्रीब्रह्मयामले तारायास्तकारादिसहस्त्रनामस्तोत्रं सम्पूर्णम् ॥

# श्री तारा सहस्त्रनाम स्तोत्रम्

कैलाशनगरे देवं महादेवं महेश्वरम् ।
भवानी रहसि प्रीत्या पप्रच्छ वरदायकम् ।।

दैव्युवाच-

कथमीशान सर्वज्ञ लभन्ते शक्तिमुत्तमाम् ।
साधकाः सर्वदा येन तन्मे कथय सुप्रभो ।।

ईश्वर उवाच

बिना पूजां बिना ध्यानं बिना जप बिनाबलिम् ।
लभन्ते येन कल्याणि तन्मे निगदितं शृणु ।।
नाम्नां सहस्त्रं तारायाः कथयिष्याम्यशेषतः ।
शृणु देवि सदा भक्त्या भक्तानां परमं हितम् ।।
बिना पूजोपचारेण बिना जपेन यत् फलम् ।
तत् फलं सकलं देवि कथयिष्यामि तच्छृणु

ॐ अस्याः श्रीतारादेव्या भक्तिकुलसर्वस्वनामस्तोत्रस्य श्रीतारा-देवता सर्वकामार्थे जपे विनियोगः ।

तारा रात्रिर्महारात्रिः कालरात्रिः कपालिनी ।
कालिका कामदा माया महामाया महोत्सवा ।।
महादानरता यज्ञा यज्ञोत्सवविभूषिता ।
चन्द्रवक्त्रा चकोराक्षी चारुनेत्रा सुलोचना ।।
त्रिनेत्रा पद्मपत्राक्षी कुरङ्गाक्षी मनोहर ।
ब्राह्मी नारायणी ज्योत्स्ना चारुकेशी सुलोचना ।।
वाराही वारुणी विद्या महाविद्या महेश्वरी ।
पिङ्गा कुञ्चितकेशी च महायज्ञस्वरूपिणी ।।
गौरी चम्पकवर्णा च कृशाङ्गी कुलपूजिता ।
सर्वानन्दस्वरूप च सर्वसङ्कटतारिणी ।।
नित्या नित्यमयी नन्दा भद्रा नीलसरस्वती ।
गायत्री सुचरित्रा च कौलव्रतपरायणा ।।
हिरण्यगर्भा भूगर्भा विश्वगर्भा यशस्विनी ।
हिमवत्तनया दिव्या दिव्याम्बरविभूषणा ।।
जगन्माता जगद्धात्री जगतामुपकारिणी ।
सैन्द्री शौम्या तथा याम्या वारुणी वायवी तथा ।।
आग्नेयी नैर्ऋती चैव ऐशानी चण्डिकाऽम्बिका ।
सुमेरुतनया वन्द्या सर्वेषामुपकारिणी ।।

ललज्जिह्वा सरोजाक्षी मुण्डस्त्रजविभूषणा ।
सर्वानन्दमयी सर्वा सर्वानन्दस्वरूपिणी ।।
धृतिर्मेधा तथा लक्ष्मीः श्रद्धापन्नगशायिनी ।
रुक्मिणी जानकी दुर्गा सत्या सत्यवती रतिः ।।
कामाख्या मोक्षदानन्दा नारसिंही सरस्वती ।
महादेवरता चण्डी चण्डदोर्दण्डखण्डिनी ।।
दीर्घकेशी सुकेशी च पिङ्गकेशी महत्कचा ।
भवानी भवपत्नी च भवभीतिहरा शची ।।
पौरन्दरी तथा विष्णोर्जाया माहेश्वरी परा ।
सर्वेषां जननी नित्या चार्वङ्गी दैत्यनाशिनी ।।
घोररूपा महेशानि कामिनी वरवर्णिनी ।
महाविद्या महामाया महामेधा महोत्सवा ।।
विरूपा विश्वरूपा च मृडानी मृडवल्लभा ।
महापुण्यप्रदा भीमा मधुकैटभनाशिनी ।।
कोटिचन्द्रप्रतीकाशा शतसूर्यसमप्रभा ।
जह्नु कन्या मनोज्ञा च पार्वती हरवल्लभा ।।
कामरूपा महेशानी नित्योत्साहा मनस्विनी ।
बैकुण्ठनाथपत्नी च तथा शङ्करवल्लभा ।।

काश्यपी कमला कृष्णा कञ्जपत्रायतेक्षणा ।
माहेश्वरी वृषारुढा पूर्णचन्द्रनिभानना ।।

मान्या मानवती धन्या कन्या हिमगिरेस्तथा ।
अपर्णा पद्मपत्राक्षी नागयज्ञोपवीतिनी ।।

महाशङ्खधरा कान्ता कमनीया नगात्मजा ।
ब्रह्माणी वैष्णवी शम्भोर्जाया गङ्गा जलेश्वरी ।।

भागीरथी मनोबुद्धिनित्यानन्दमयी सदा ।
हरप्रिया गिरिसुता हरपत्नी तपस्विनी ।।

महाव्याधिहरा देवी शुम्भासुरनिषूदिनी ।
महापुण्यप्रदा भीमा मधुकैटभनाशिनी ।।

शङ्खिनी चक्रिणी धात्री हस्ते पुस्तकधारिणी ।
चामुण्डा चपला तुङ्गा भद्रा दैत्यनिकृन्तनी ।।

शान्तिर्निन्द्रा महानिद्रा गुह्यनिद्रा च रेणुका ।
कौमारी कुलजा कुन्जी कौलव्रतपरायणा ।।

नवदुर्गा सदाचारा द्रौपदी द्रुपदात्मजा ।
सृष्टिः सर्वाद्यकालीना निशुम्भप्राणनाशिनी ।।

पद्मिनी वसुधा पृथ्वी रोहिणी विन्ध्यवासिनी ।
शिवा शक्तिर्महाशक्तिः शाङ्करी शक्तिवल्लभा ।।

दैत्यप्राणहरा दात्री दया दामोदरप्रिया ।
क्षान्तिः क्षेमकरी बुद्धिर्बौद्धाचारपरायणा ।।

श्रीविद्या भैरवी भव्या भारती भयनाशिनी ।
तापसी तारिणी तीक्ष्णा तीक्ष्णदैत्यविनाशिनी ।।

दात्री दानपरा काली दुर्गा दैत्यविनाशिनी ।
पद्मा पद्मावती हृष्टा तुष्टा पुष्टा तथोर्वशी ।।

वज्रिणीवज्रहस्ता च तथा नारायणी शिवा ।
खण्डिनी खड्गहस्ता च कर्त्तृखर्परधारिणी ।।

देवाङ्गना देवमान्या देवकन्या पुलोमजा ।
सुखिनी सुखदात्री च सर्वसौख्यविवर्धिनी ।।

शीला शीलवती सूक्ष्मा सूक्ष्माकारा वरप्रदा ।
वरेण्या वरदा वाणी ज्ञानिनी ज्ञानदाऽमला ।।

उग्रकाली महाकाली भद्रकाली च दक्षिणा ।
भृगुवंशसमुद्भूता भार्गवी भृगुवल्लभा ।।

शूलिनी शूलहस्ता च मयूरवरवाहना ।
महामांसरता रक्ता रक्तखर्परधारिणी ।।

रक्ताम्बरधरा नामा रमणी सुरनायिका ।
परमानन्ददा ज्येष्ठा योगिनीगणसेविता ।।

अम्बा जाम्बवती सत्या सत्यभाषा नगात्मजा ।
रौद्री रौद्रस्वना रौद्रा रौद्रदैत्यविनाशिनी ।।

कुमारी कौशिकी विद्या कालदैत्यविनाशिनी ।
शम्भुपत्नी शम्भुरता शम्भुजाया महोदरी ।।

शिवपत्नी शिवरता शिवजायाम्बिका तथा ।
हरपत्नी हररता हरजाया च शूलिनी ।।

मदनान्तककान्ता च मदनान्तकवल्लभा ।
गिरिजा गिरिकन्या च गिरिशस्य च वल्लभा ।।

भूतभव्या भवा पुष्टा पुष्टा पावनी परिपालिनी ।
अदृश्याऽव्यक्तरूपा च इष्टा स्वेश्टप्रवर्धिनी ।।

अच्युता प्रच्युता प्राणा प्राणदा वासवेश्वरी ।
अपांतिधिसमुद्भूता धारिणी च प्रतिष्ठिता ।।

उद्भवा क्षोभणा क्षेमा श्रीगर्भा परमेश्वरी ।
कराला पुष्टदेहा च कारिणी कञ्जलोचना ।।

शरण्या कमला प्रीता विमलानन्दवर्धिनी ।
कपर्दिनी कल्पनाभा सुमनानन्दवर्धिनी ।।

उदीर्णभूषणा भव्या सुरसेना सुरेश्वरी ।
श्रीती शिशिरानन्दा शिशिराचलकन्यका ।।

सुरमान्या सुरश्रेष्ठा ज्येष्ठा प्राणोश्वरी स्थिरा ।
तमोघ्नी ध्वांतसंहन्त्री प्रयतात्मा पवित्रता ।।

प्रद्योतिनी रथारूढा सर्वलोकप्रकाशिनी ।
मेधाविनी महावीर्या हंसी संसारतारिणी ।।

प्रणतप्राणिनामार्त्तिहारिणी दैत्यनाशिनी ।
डाकिनी शाकिनी शीला वरखट्वाङ्गधारिणी ।।

कौमुदी कुमुदा कुन्दा कौलिका कुलजात्मजा ।
गर्विता गुणसम्पन्ना नगजा खगवाहिनी ।।

चन्द्रानना महोग्रा च चारुमूर्धजशोभिता ।
मनोज्ञा माधवी मान्या माननीया महद्गुणा ।।

ज्येष्ठा मघा च पुष्या च धनिष्ठा पूर्वफाल्गुनी ।
रक्तबीजादिहन्त्री च रक्तबीजविनाशिनी ।।

चण्डमुण्डारिहन्त्री च चण्डमुण्डविनाशिनी ।
कर्त्री हर्त्री सुकर्त्री च विमलामलवाहिनी ।।

निर्मला भास्करी भीमा महिषासुरघातिनी ।
कालिन्दी यमुना वृद्धा युवती बालिका तथा ।।

कौशल्या कौमुदी माद्री कन्धती चाप्यरुन्धती ।
पुरारिगृहिणी पूर्णा पूर्णरूपा यशस्विनी ।।

सम्पूर्णचन्द्रवदना बालचन्द्रसमप्रभा ।
रेवती रमणी चित्रा विचित्राम्बरभूषणा ।।

वीणा वीणावती विद्या यशोदा च यशस्विनी ।
नवपुष्पसमुद्भूता नवपुष्पासवोत्सुका ।।

नवपुष्पस्त्रजा माला माल्यभूषणशोभिता ।
नवपुष्पसमप्राणा नवपुष्पसमुत्सुका ।।

नवपुष्पात्मका पुष्पा पुष्पस्त्रजविभूषणा ।
नवपुष्पगुणोपेता नवपुष्पोपशोभिता ।।

नवपुष्पप्रिया प्रीता प्रेममण्डलमध्यगा ।
कुलशास्त्रप्रदीप्ता च कुलमार्गप्रवर्धिनी ।।

श्मशानभैरवी कालभैरवी भैरवीप्रिया ।
आनन्दभैरवी ध्यानभैरवी पुरभैरवी ।।

महाभैरवपत्नी च भैरवी लोकभैरवी ।
सुविद्या भैरवी नीतिभैरवी गुणभैरवी ।।

सम्मोहभैरवी पुष्टिभैरवी तुष्टिभैरवी ।
सृष्टिस्थितिभैरवी च भैरवी स्थितिभैरवी ।।

पुण्डरीकाक्षगृहिणी पुण्डरीकाक्षवल्लभा ।
आनन्दसुन्दरी वीरसुन्दरी स्थितिसुन्दरी ।।

आनन्दसुन्दरी कालसुन्दरी पुरसुन्दरी ।
या मायासुन्दरी सौम्या सुन्दरी लोकसुन्दरी ।।

या विद्यासुन्दरी नीतिसुन्दरी गुणसुन्दरी ।
मल्लिकाहाररसिका मल्लिकाहारशोभिता ।।

नवचम्पकवर्णाभा नागकेशरशोभिता ।
जवाकुसुमसङ्काशा जवाकुसुमशोभिता ।।

प्रिया प्रियङ्करी विष्णोर्दानवेन्द्रविनाशिनी ।
ज्ञानेश्वरी ज्ञानदात्री ज्ञानानन्दप्रदायिनी ।।

गुणगौरवसम्पन्न गुणशीलसमन्विता ।
रूपयौवनसम्पन्ना रूपयौवनशोभिता ।।

गुणाश्रया गुणवती गुणगौरवसुन्दरी ।
लसत्तारापतिप्रख्या ताटङ्कद्वयशोभिता ।।

वृक्षमूलस्थिता देवी वृक्षशाखोपरिस्थिता ।
वृक्षमध्याग्रनिलया वृक्षमध्यनिवासिनी ।

कुमुद्वती कुमुदिनी कुमुदा कुमुदाकरा ।
कुसुम्भरूपरुचिरा कुसुम्भारुणमस्तका ।।
स्वयम्भूपुष्पसङ्काशा स्वयम्भूपुष्पधारिणी ।
स्वयम्भूपुष्पसरसा मग्ना ध्यानवती सदा ।।
शुक्रप्रिया शुक्ररता शुक्रमज्जनतत्परा ।
पर्णाऽपर्णा सुपर्णा च निष्पन्ना पापनाशिनी ।।
मदिरा मोदसम्पन्ना मदिरा मोदधारिणी ।
सर्वाश्रिया सर्वगुणानन्दकन्दलकारिणी ।।
नारीपुष्पसमप्राणा नारीपुष्पसमुत्सुका ।
नारी पुष्पोत्सवा नारी नारीपुष्परता मृगी ।।
चतुर्भुजा दशभुजा अष्टादशभुजा तथा ।
द्विभुजा षड्भुजाष्टारपङ्कजा परिसंस्थिता ।।
कौवेरी कौरवी कौर्व्या कुरुकुल्ला कपालिनी ।
विपरी कदली जङ्घा रम्भोरु रामवल्लभा ।।
निशाचरी निशामूर्तिर्निशाचन्द्रसमप्रभा ।
चान्द्री चन्द्रकला चन्द्रा चारुचन्द्रसमप्रभा ।।
स्त्रोतस्विनी स्त्रोतवती सर्वदुःखार्तिनाशिनी ।
सर्वाधारा सर्वमय सर्वानदप्रवर्धिनी ।।
सर्वचक्रेश्वरी सर्वा सर्वमन्त्रमयी सदा ।
सहस्त्रनयनप्राणा सहस्त्रनयनप्रिया ।।
सहस्त्रशीर्षा सुसमा सदम्भा सर्वभक्षिका ।
पष्टिका षट्सुचक्रस्था षड्विंशदलमध्यगा ।।
षड्विंशपद्ममध्यस्था षड्विंशदलमध्यगा ।
हुकारवर्णनिलया हकाराक्षरभूषिता ।।
हारिणी हारवनिता हारहीरकशोभिता ।
ह्रींकारबीजसहिता ह्रींकारैरुपशोभिता ।।
कन्दर्पस्य कला कुल्या कौलिनी कुलतर्पिता ।
केतकी कुसुमप्राणकेतकी कृतभूषणा ।।
केतकीकुसुमासक्ता केतकीपरिभूषिता ।
कर्पूरपूर्णवदना कलानाथसमप्रभा ।।
कला केलिप्रिया कीर्णकदम्बकुसुमोत्सुका ।
कादम्बिनी करिगतिः कुञ्जरेश्वरगामिनी ।।
खर्वा च खञ्जनद्वन्द्वलोचना खड्गभूषिता ।
खद्योत इव दुर्लक्ष्या खद्योत इव चञ्चला ।।
गया गदागुणप्रीता गीतवाद्यप्रिया गतिः ।
गणेश्वरी गणेज्या च गणपूज्या गणप्रदा ।।
गुणाढ्या गुणसम्पत्तिर्गुदात्री गुणात्मिका ।
गुर्वी गुरुतरा गौरी गाणपत्यफलप्रदा ।।
घर्मांशुगृहिणी घर्मा घर्मसिन्धुनिवासिनी ।
घर्घरा घोरवदना घोरदैत्यविनशिनी ।।
घोषा घोषवती घोष्या घोषपुत्री घनालया ।
चंवरी चारुनयना चारुवक्त्रा चतुर्गुणा ।।
चतुर्वेदमयी चूर्ण - चन्द्रास्या चतुरानना ।
चलञ्चकोरनयना चलतूखञ्जनलोचना ।।
चलदम्भोजवदना चलदम्भोजशोभिता ।
छात्री छात्रप्रिया छत्रा छत्रचामरशोभिता ।।
छिन्ना छर्दिछिन्नशिरा छिन्ननासा छलान्विता ।
छलाद्या छलसन्त्रस्था छलरूपा छलच्छिरा ।।
छकारवर्णनिलया छकाराद्या छलप्रिया ।
छद्मिनी छद्मनिरता छद्मछद्मनिवासिनी ।।
जगन्नाथप्रिया जीवा जगन्नाथरता जरा ।
जीर्णा जीमूर्तवनिता जीमूर्तैरूपशोभिता ।।

जामातृवरदा जृम्भा जमलार्जुनधारिणी ।
जरा जरान्विता जृम्भा जम्भारातिवरप्रदा ।।
जिता जयित्री जयदा जयदात्री जयप्रदा ।
झल्लरा झीत्कृतिर्झिल्लीझरी झर्झरिका तथा ।।
टाङ्कारकारिणी टीत्कारिणी टङ्कधारिणी ।
ठक्कुराज्ञा डमरुकरा डात्कारी डमरुप्रिया ।।
ढक्कारवाद्यढक्कारी तुलसी तालभक्षिका ।
तुला तौलिनिका तीर्णा तारा तारिणिका तथा ।।
तन्त्रविज्ञा तन्त्ररता तन्त्रविद्या च तन्त्रदा ।
तान्त्रिका तन्त्रगोप्या च तन्त्रतारा च तन्त्रपा ।।
तन्त्रधात्री तन्त्रकारी तन्त्रनारीरतातुरा ।
तपःप्रभावा तन्त्रज्ञा तन्त्रसारफलप्रदा ।।
तुहिनांशुसमाभासा तुहिनांशुसमप्रभा ।
तुषारकरतुल्याङ्गी तुषारकरसुन्दरी ।।
तुषारधामतुल्यास्या तुषारांशुसमानना ।
तुहिनाद्रिसुता तार्क्षा तालाङ्गी तालवर्जिता ।।
तारस्वरेण सहिता तारस्वरविभूषिता ।
थकारकूटनिलया थकाराक्षरमालिनी ।।
दयावती दीनरता दुःखदारिद्र्यनाशिनी ।
दौर्भाग्यदुःखदलिनी दौर्भाग्यापदनाशिनी ।।
दुहिता दीनबन्धुश्च दानवेन्द्रविमर्दिनी ।
दानदात्री दानपरा दानसम्मानतोषिता ।।
दाल्भ्यादिसेविता दान्ता दामोदरपरायणा ।
दधीची वरदा दुष्टा दानवेन्द्रविनाशिनी ।।
दीर्घनेत्रा दीर्घकचा दीर्घनासा च दीर्घिका ।
दारिद्रयदुःखशमनी दुष्टासुरनिषूदिनी ।।
दम्भिका दम्भहा दम्भा दनुजेन्द्रविनाशिनी ।
धनधान्यप्रदा धन्या धनेश्वरवरप्रदा ।।
धर्मिणी धर्मिका धर्म्या धर्माधर्मप्रवर्धिनी ।
धर्मेश्वरी धर्मदात्री धर्मानन्दप्रवर्धिनी ।।
धनाध्यक्षा धनप्रीता धनाढ्या धनतोषिता ।
धीरा धैर्यवती धृष्णा धवलाम्भोजसन्निभा ।।
धरिणी धारिणी धात्री धुरीणा धवलास्पदा ।
धार्मिका धर्म सहिता धर्मनिन्दकवर्जिता ।।
नवीना निरजा निम्ना निम्ननाभिर्नगेश्वरी ।
नूतनाम्भोजनयना नवीनाम्भोजसुन्दरी ।।
नागरी नागराजेन्या नागराजसुता नगा ।
नागराजपतिर्नग्ना नागराजविभूषिता ।।
नगेश्वरी नगारूढा नगराजकुलेश्वरी ।
नवीनेन्दकलानन्दा नन्दिकेश्वरवल्लभा ।।
नीरजा नीरजाक्षी च नीरजद्वन्द्वलोचना ।
नीरसूता नीरभवा नीरनिर्मलदेहिनी ।।
नागयज्ञोपवीताढ्या नागयज्ञोपवीतिका ।
नागकेसरसन्तुष्टा नागकेसरमालिनी ।।
नवीनकेतकीकुन्दमन्दारस्त्रजभूषिता ।
नायिका नायकप्रीता नायकप्रेमतोषिता ।।
नायकप्रेमसहिता नायप्रेमतोषिता ।
नायकानन्दनिलया नायकानन्दकारिणी ।।
नर्मकर्मरता निद्रा नर्मकर्मपरायणा ।
नर्मकर्मप्रिया नर्मा नर्मधर्मपरायणा ।।
नर्मप्रीता नर्मरता नर्मध्यानपरायणा ।
नर्मकर्मैकसहिता नर्मकर्मैकपालिका ।।

नरनारीगुणप्रीता नरनारीवरप्रदा ।
नारायणप्रिया निष्का निष्कवर्णा नकारहा ।।
पुष्पप्रिया पुष्परता पौष्पीपानपरायणा ।
पुष्पप्रीता च पुष्पेज्या पौष्पीपानपरायणा ।।
पुण्यदा पूर्णिमा पुण्या पुण्यकोटिफलप्रदा ।
पुराणागमवेद्या च पुराणागमगोपिता ।।
पुराणागमगोप्या च पुराणागमतोषिता ।
पुराणगोचरा पूर्वा पूर्णा प्रोढविनाशिनी ।।
प्रह्लादहृदयाह्लादगेहिनी पुण्यचारिणी ।
फाल्गुनी फाल्गुनप्रीता फाल्गुनप्रेमधारिणी ।।
फल्गुफलप्रदा चैव फणिराजविभूषिता ।
फणाकारा फणिप्रीता फणिहारविभूषिता ।।
फणीशकृतसर्वाङ्गभूषणा फणिवाहिनी ।
फणिप्रीता फणिरता फणिकङ्कणधारिणी ।।
फलदात्री फलासक्ता फलाभरणभूषिता ।
फकारकूटसर्वाङ्गी फाल्गुनानन्दवर्धिनी ।।
वासुदेवरता विज्ञा विज्ञविज्ञानकारिणी ।
वीणावती वलाकीर्णा बालपीयूषरोचिषा ।।
बाला वसुमती विद्या विद्याहारविभूषिता ।
विद्यावती वैद्यपदा प्रीता वैवस्वती बलिः ।।
वाणी विलासकरणी वराङ्गस्था वरानना ।
विष्णोर्वक्षस्थलस्था च वाग्वती बिन्ध्यगेहिनी ।।
निवारतरुसंस्था च नीवारकुसुमोत्सुका ।
भीतिहा भयदा भानीरंशुजालसमप्रभा ।।
भार्गवेज्या भृगोः पूज्या भारद्वाजनमस्कृता ।
भतिहा भयसम्पन्ना भीमाकाराभ्रसुन्दरी ।।
मायाधरी मानरता मानसम्मानतत्परा ।
माधवानन्ददा माध्वी मदिरा मदिरेक्षणा ।।
महोत्साहगुणोपेता महती महदद्भुता ।
मदिरा मोदरमिता मदिरामज्जने रता ।।
यशोधरी यशोविद्या यशोदानन्दवर्धिनी ।
यशःकर्पूरधवला यशोदामविभूषणा ।।
यमराजस्वसा योगमार्गानन्दप्रवर्धिनी ।
यादवानन्दकरिणी यादवानन्दर्वाधिनी ।।
यज्ञप्रीता यज्ञमयी यज्ञकर्मविभूषणा ।
रामप्रिया रामरता रामतोषणतत्परा ।।
राज्ञी राजकुलेज्या च राजराजेश्वरी रमा ।
रमणी रामणी रम्या रामानन्दप्रदायिनी ।।
रजनीकरपूर्णा स्याद्रक्तोत्पलविलोचना ।
लाङ्गली प्रेमसन्तुष्टा लाङ्गलीप्रणयप्रिया ।।
लाक्षारुणा च ललना लीला लीलावती लया ।
लङ्केश्वरगुणप्रीता लङ्केशवरदायिनी ।।
लवङ्गकुसुमप्रीता लवङ्गकुसुमस्त्रजा ।
बाला विवस्वद्गृहिणी विवस्वत्प्रेमधारिणी ।।
शवला शरला शल्या शरण्या श्रीः शरद्गुणा ।
षट्कोणचक्रमध्यस्था सम्पदा ह्रीविशोभिता ।।
क्षेमा अम्बा तथाज्ञा च इडा ईश्वरवल्लभा ।
उग्राख्या च तथा चोर्णा ऋकारा ऋस्वरोद्भवा ।।
लृकारवर्णकूटस्था लृकारस्वरभूषिता ।
एकारवर्णकूटस्था एकारस्वरभूषिता ।।
एष्या चैष्या तथा चोषा औकाराक्षररूपिणी ।
अंसा अकारवनिता सर्वागमसुगोपिता ।।

# फलश्रुति

य इदं पठते स्तोत्रं प्रत्यहं भक्तिसंयुतः ।
दिवा रात्रौ तथा सन्ध्यासमये स महेश्वरः ।।
स्तवमात्रस्य पाठेन राजा किङ्करतामियात् ।
सर्वागमेषु पूज्यः स्यात् सर्वतन्त्रे स्वयं हरः ।।
शिवस्थाने च शय्यायां शून्यागारे चतुष्पथे ।
यः पठेच्छृणुयाद् वापि स योगी नात्र संशयः ।।
यानि नामानिसन्त्य न् प्रसङ्गान् मुरवैरिणः ।
ग्राह्यानि तानि कल्याणि नान्यानि तु कदाचन ।।
हरेर्नाम न गृह्णीयात्र स्पृशेत् तुलसीदलम ।
नान्यनिन्ता प्रकर्त्तव्या नान्यनिन्दा कदाचन ।।
सिन्दूरकरवीराद्यैः पुष्पैर्लोहितकैः शुभाम् ।
योऽर्चयेद् भक्तिभावेनतस्याऽसाध्यं न किञ्चन ।।
वातस्तम्भं जलस्तम्भं गतिस्तम्भं विवस्वतः ।
वह्नेः शैत्यं करोत्येष स्तवस्यास्य च कीर्त्तनात् ।।
स्त्रियमाकर्षयेत् तूर्णमरीन् मर्दयति हठात् ।
मोहयेद् राजदाराश्च देवानपि वशं नयेत् ।।
यः पठेच्छृणुयाद् वापि एकचित्तेन सर्वदा ।
स दीर्घायुः सुखी वाग्मी वाणी तस्य वशङ्करी ।।
सर्वतीर्थाभिषेकेन गयाश्राद्धेन यत् फलम् ।
तत् फलं सकलं तस्य यःपठेदेकचित्ततः ।।
येषामाराधने श्रद्धा ये च साधितुमुद्यताः ।
येषा कृतार्थं सर्वत्र गतिर्देवि पदालये ।।
ऋतुयुक्तलता मध्ये स्थित्वा दण्डेन ताडयेत् ।
जप्त्वा स्तुत्वा च भक्तया च गच्छेद्वै तारिकापदं ।।
अष्टम्यां च चतुर्दश्यां नवम्यां शनिवासरे ।
संक्रान्तौ मङ्गले रात्रावमावस्यायां योऽर्चयेत् ।।
वर्षवाप्य तु देवेशि तस्याधीनाश्च सिद्धयः ।
मृतपुत्रा च या नारी मृतगर्भा च याऽङ्गना ।।
मृतपत्या च या नारी दौर्भाग्यपदपीडिता ।
बन्ध्या च काकबन्ध्या च मृतपुत्रा च याऽङ्गना ।।
धनधान्यविहीना च रोगशोकाकुला च या ।
ताभिरेतन् महादेवि भूर्जपत्रे लिखापयेत् ।।
सव्ये भुजे च बध्नीयात् सर्वसौख्यवती भवेत् ।
एवं पुमानपि प्रायो दुःखेन परिपीडितः ।।
सभायां व्यसने घोरे विवादे शत्रुसङ्कटे ।
चतुरङ्गे तथा युद्धे सर्वलापदपीडिते ।।
स्मरणादस्य कल्याणि संक्षयं यान्ति दूरतः ।
पूजनीया प्रयत्नेन शून्यागारे शिवालये ।।
विल्ववृक्षतले देवि सर्वदा कुलमण्डलैः ।
शर्करासवसंयुक्तैर्दुग्धैः सतण्डुलैः ।।
अपूप - पिष्ट - संयुक्तैर्नैवेद्यश्च यथोचितैः ।
निवेदितं च यद् द्रव्यं भोक्तव्यं चावधानतः ।।
न चेत्तद्भुज्यते मोहाद्भोक्तुं नृत्यन्ति देवताः ।
अनेनैव विधानेन योऽर्चयेत् परमेश्वरीम् ।।
स भूमिमण्डले देवि साक्षादीशो न संशयः ।
महाशङ्खेन कल्याणि सर्वं कार्यं जपादिकम् ।।
कुलसर्वस्वकस्यैव प्रभावो वर्णितो मया ।
न शक्यते समाख्यातुं वर्षकोटिशतैरपि ।।
किञ्चिन्मयापि चापल्यात् कथितं परमेश्वरि ।
जन्मान्तरसहस्त्रेण कथितुं नैव शक्यते ।।
कुलीनाय प्रदातव्यं ताराभक्तिपराय च ।
अन्यभक्ताय नो देयं वैष्णवाय विशेषतः ।

कुलीनाय महेच्छाय भक्तिश्रद्धापराय च ।
महात्मने सदा देयं परीक्षितगुणाय च ।।
नाऽभक्ताय प्रदातव्यं पन्थान्तरंरताय च ।
न देयं देवदेवेशि गोप्यं सर्वागमे सदा ।।
पठनीयं सदा देवि सर्वावस्थासु सर्वदा ।।

यः स्तोत्रं कुलनामकं प्रतिदिनं भक्तया पठेन्मानवः । स स्याद् वित्तचर्यर्धनैश्वरसमो विद्याभवैर्वाक्पतिः ।। सौन्दर्येण च मूर्तिमान् मनसिजः कीर्त्या च शीतद्युतिः । शवत्याः शङ्कर एव शौर्यविभवैर्भूमिपतिर्नान्यथा ।।

।। इति श्री तारायाः कुलसर्वस्वं नाम सहस्त्रनामस्तोत्रं समाप्तम् ।।

इति हिमालयस्य तपस्विनो कायाकल्पी सन्त ब्रह्मलीन योगाधिराजः ब्रह्मर्षि बर्फानी दादाजी महाराज
स्नेहकृपाभाजन शिष्यवरः एवं गोरखपुर मण्डलार्गत त्रिफला ग्रामादागतः सरयूद्विजः कश्यप
गोत्रीय पंक्ति पावन त्रिफला पाण्डेय श्रीगौर्मुखऋषिवर्यस्यवंशजः गौरहा-उपाधिपद-
विभूषितः बिलासपुर छत्तीसगढ राज्यान्तर्गतः ग्राम सकरी निवासिनो
धर्मभूषण पण्डित श्रीधर गौरहा नामधेयेन
सङ्कलितःसम्पादितश्च महाविद्या रत्नाकरः
तारा महाविद्या चतुर्थ पटलः सम्पूर्णम् ।

*

द्वैत कल्पित होते हुए भी साधना में अद्वैत प्राप्ति के लिए आवश्यक है। उपासना के लिए द्वैत की परिकल्पना अपरिहार्य है। उपासना की समाप्ति में समर्पण में द्वैत का भी समर्पण हो जाता है। भावना की दृढ़ता से शक्ति की सिद्धि होती है। गुरु, मन्त्र, देवता और अपने प्राण की एकता के साधन से आत्मज्ञान होता है। उपासकों से यह अपेक्षा की जाती है कि, वे अपने आचरण में सर्वात्म भाव का परिचय दें और भगवती की उपासना इस बुद्धि से करें कि, इस उपासना के फल के सभी साझेदार हों। यह अपने आप में परम सुख है। अपने आप में परामुक्ति है।

- पद्मभूषण प्रो. विद्यानिवास मिश्र जी